Click here to go back



॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

## अथ बृहस्पति कवचं

ओं अस्य श्री बृहस्पति कवच महामंत्रस्य ईश्वर ऋषिः। अनुष्टुप्छंदः। बृहस्पतिर्देवता। अं बीजं। श्रीं शक्तिः। क्लीं कीलकं। मम बृहस्पति ग्रहप्रसाद सिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) गां अंगुष्ठाभ्यां नमः। गीं तर्जनीभ्यां नमः। गूं मध्यमाभ्यां नमः। गैं अनामिकाभ्यां नमः। गौं कनिष्ठिकाभ्यां नमः। गः करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) गां हृदयाय नमः। गीं शिरसे स्वाहा। गूं शिखायै वषट्। गैं कवचाय हुं। गौं नेत्रत्रयाय वौषट्। गः अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) तप्तकांचन वर्णाभ्यं चतुर्भुजसमन्वितं। दंडाक्षसूत्रमालां च कमंडलं वरान्वितं॥ पीतांबरधरं देवं पीतगंधानुलेपनं। पुष्परागमयाभूषं विचित्रमकुटोज्वलं॥ स्वर्णाश्वरथमारूढं पीतध्वज सुशोभितं। मेरोः प्रदक्षिणं संयगाचरत्नं सुशोभनं॥ अभीष्टवरदं देवं सर्वज्ञं सुरपूजितं। सर्वकामार्थ सिद्ध्यर्थं प्रणमामि गुरुं सदा॥ (अथ कवचं) बृहस्पतिः शिरः पातु ललाटं पातु मे गुरुः। कर्णौ सुरगुरुः पातु नेत्रे मे भीष्टदायकः॥ नासां पातु सुराचार्यो जिह्वां मे वेदपारगः। मुखं मे पातु सर्वज्ञो भुजौ पातु शुभप्रदः॥ करौ मे वरदः पातु वक्षो मे गीष्पतिः। स्तनौ मे पातु वागीशः कुक्षी मे शुभलक्षणः॥ नाभिं पातु सुनीतिज्ञः कटिं मे पातु सर्वदः। ऊरू मे पातु पुण्यात्मा जंघे मे ज्ञानदः प्रभुः॥ पादौ मे पातु विश्वात्मा सर्वांगं सर्वदा गुरुः॥ (फलश्रुतिः) यः इदं कवचं दिव्यं त्रिसंध्यं प्रपठेन्नरः। सर्वान् कामान्वाप्नोति सर्वत्र विजयी भवेत्॥ सर्वत्र पूज्यो भवति वाक्वतेश्च प्रसादतः। इति ब्रह्मवैवर्त पुराणे उत्तरखंडे बृहस्पति कवचं॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back